१५ जुलै २०२१

2014 359-006 Week 52 DEC THURSDAY 25

# श्री नील सरस्वती स्तोत्रम्।

## श्री गणेशाय नमः।

घोररूपे महारावे सर्वशत्रु भयंकारि
भक्तेभ्यो वरदे देवि त्राहि मां शरणागतम्॥१॥
ॐ सुरासुरार्चिते देवि सिद्धगन्धर्वसेविते।
जाड्यपापहरे देवि त्राहि मां शरणागतम्॥२॥
जटाजूटसमायुक्ते लोलजिह्वान्तकारिणी।
द्रुतबुद्धिकरे देवि त्राहि मां शरणागतम्॥३॥
सौम्यक्रोधधरे रूपे चण्डरूपे नमोऽस्तु ते।
सृष्टिरूपे नमस्तुभ्यं त्राहि मां शरणागतम्॥४॥

जडानां जडतां हन्ति भक्तानां भक्तवत्सला।
मूढतां हर मे देवि त्राहि मां शरणागतम्॥५॥
वं ह्रूं ह्रूं कामये देवि बलिहोमप्रिये नमः।
उग्रतारे नमो नित्यं त्राहि मां शरणागतम्॥६॥
बुद्धिं देहि यशो देहि कवित्वं देहि देहि मे।
मूढत्वं च हरेद् देवि त्राहि मां शरणागतम्॥७॥
इन्द्रादिविलसद्द्वन्द्ववन्दिते करुणामयी।
तारे ताराधिनाथास्ये त्राहि मां शरणागतम्॥८॥

अष्टम्यां च चतुर्दश्यां नवम्यां यः पठेन्नरः।
षण्मासैः सिद्धिमाप्नोति नात्र कार्या विचारणा॥९॥
मोक्षार्थी लभते मोक्षं धनार्थी लभते धनम्।
विद्यार्थी लभते विद्यां तर्कव्याकरणादिकम्॥१०॥
इदं स्तोत्रं पठेद्यस्तु सततं श्रद्धयान्वितः।
तस्य शत्रुः क्षयं याति महाप्रज्ञा प्रजायते॥११॥
पीडायां वापि संग्रामे जाड्ये दाने तथा भये।
य इदं पठति स्तोत्रं शुभं तस्य न संशयः॥१२॥

इति प्रणम्य स्तुत्वा च योनिमुद्रां प्रदर्शयेत्।

इति श्री नीलसरस्वती स्तोत्रं सम्पूर्णम्॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| JANUARY '15 | | | | 1 | 2 | 3 | 4 |
| | 5 | 6 | 7 | 8 | 9 | 10 | 11 |
| | 12 | 13 | 14 | 15 | 16 | 17 | 18 |
| | 19 | 20 | 21 | 22 | 23 | 24 | 25 |
| | 26 | 27 | 28 | 29 | 30 | 31 | |
| | M | T | W | T | F | S | S |

©www.madhavraghuveer.com